## ङेर्यः । (१३/२०४)

ङः इति चतुर्थ्येकवचनस्य[1] ग्रहणम् । अकारान्तादङ्गादुत्तरस्य ङे इत्येतस्य यः इत्ययमादेशो भवति । वृक्षाय । प्लक्षाय । अतः इति किम् ? सख्ये । पत्ये । 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या. प. १२) इति परिभाषेयमनित्या, तेन [2]दीर्घो भवति ॥

## सर्वनाम्नः स्मै । (१४/२१५)

अकारान्तात् [3]सर्वनाम्नः उत्तरस्य ङः स्मै इत्ययमादेशो भवति । सर्वस्मै । विश्वस्मै । यस्मै । तस्मै । कस्मै । अतः इत्येव, भवते । अथोऽत्रास्मै इत्यन्वादेशेऽशादेशे[4] (२.४.३२/३५०) एकादेशः प्राप्नोति ? तत्रान्तरङ्गत्वादेकादेशात् पूर्वं स्मैभावः क्रियते पश्चादेकादेशः इति ॥

## ङसिङ्योः स्मात्स्मिनौ । (१५/२१६)

[5]ङसि ङि इत्येतयोरकारान्तात् सर्वनाम्नः उत्तरयोः [6]स्मात् स्मिन् इत्येतावादेशौ भवतः । ङसि इत्येतस्य स्मात् । सर्वस्मात् । विश्वस्मात् । यस्मात् । तस्मात् । कस्मात् । ङि इत्येतस्य स्मिन् । सर्वस्मिन् । विश्वस्मिन् । यस्मिन् । तस्मिन् । अन्यस्मिन् । अतः इत्येव, भवतः । भवति । सर्वनाम्नः इत्येव, वृक्षात् । वृक्षे ॥

## पूर्वादिभ्यो नवभ्यो वा । (१६/२२१)

पूर्वादिभ्यो नवभ्यः सर्वनाम्नः उत्तरयोः ङसिङ्योः [7]स्मात् स्मिन् इत्येतावादेशौ वा भवतः । पूर्वस्मात्, पूर्वात् । पूर्वस्मिन्, पूर्वे । परस्मात्, परात् । परस्मिन्, परे । अवरस्मात्, अवरात् । अवरस्मिन्, अवरे । दक्षिणस्मात्, दक्षिणात् । दक्षिणस्मिन्, दक्षिणे । उत्तरस्मात्, उत्तरात् । उत्तरस्मिन्, उत्तरे । अपरस्मात्, अपरात् । अपरस्मिन्, अपरे । अधरस्मात्, अधरात् । अधरस्मिन्, अधरे । स्वस्मात्, स्वात् । स्वस्मिन्, स्वे । अन्तरस्मात्, अन्तरात् । अन्तरस्मिन्, अन्तरे । नवभ्यः इति किम् ? त्यस्मात् । त्यस्मिन् ॥

## जसः शी । (१७/२१४)

अकारान्तात् सर्वनाम्नः [8]उत्तरस्य जसः [9]शी इत्ययमादेशो भवति । सर्वे । विश्वे । ये । के । ते । [10]दीर्घोच्चारणमुत्तरार्थम् । त्रपुणी । जतुनी ॥

## औङ आपः । (१८/२८७)

[11]आबन्तादङ्गादुत्तरस्य औङः [12]शी इत्ययमादेशो भवति । खट्वे तिष्ठतः । खट्वे पश्य । बहुराजे । करीषगन्ध्ये । ङकारः सामान्यग्रहणार्थः, औटोऽपि ग्रहणं यथा स्यात् ।

---

1. अतः इत्यधिकम् क. 2. दीर्घत्वं भवत्येव ङ. 3. अङ्गात् इ.ई.ह. 4. कृते इत्यधिकम् इ. ई.ह. 5. सर्वनाम्नः इत्येव इत्यधिकम् क. 6. स्मात्स्मिनौ इ. 7. स्थाने इत्यधिकम् क. 8. अङ्गात् इत्यधिकम् क. 9. स्थाने इत्यधिकम् क. 10. शी इति इत्यधिकम् ह. 11. आकारान्तात् क, आकारात् इ. 12. स्थाने